# Master of Arts Examination, 2022

(2nd Year, 4th Semester )

## SANSKRIT

## Course – XVI/B

## ( Vedic Hymns and Pāṇinīya Śikṣā )

Time : Two hours | Full Marks : 30

*The figures in the margin indicate full marks.*

1. अधोनिर्दिष्टेषु **प्रश्नद्वयं** संस्कृतभाषया देवनागरीलिपिमाश्रित्य समाधेयम्। 6×2=12

   a) ऋग्वेदीये नासदीयसूक्ते समुपलब्धं दार्शनिकतत्त्वं सम्यगुपस्थाप्यताम्।

   b) भवदधीते ऋग्वेदीये पुरुषसूक्ते स्फुटीकृतः पुरुषस्य महिमा विव्रियताम्।

   c) अथर्ववेदीये भूमिसूक्ते प्रकटीकृतं पर्यावरणचिन्तनमधिकृत्य कश्चन नातिदीर्घः प्रबन्धो विरच्यताम्।

2. अधोलिखितयोः **एकस्य** सप्रसङ्गं व्याख्या संस्कृतभाषया देवनागीलिप्या च कार्या। 6

   a) प्र तेऽरदद्वरुणो यातवे पथः सिन्धो यद्वाजाँ अभ्यद्रवस्त्वम्।
   भूम्या अधि प्रवता यासि सानुना यदेषामग्रं जगतामिरज्यसि॥

   b) सुषारथिरश्वानिव यन्मनुष्यान्नेनीयतेऽभीशुभिर्वाजिन इव।
   हृत्प्रतिष्ठं यदजिरं जविष्ठं तन्मे मनः शिवसंकल्पमस्तु॥

3. अधोनिर्दिष्टयोः **एकस्य** उत्तरं संस्कृतभाषया देवनागरीलिप्या च प्रदेयम्। 6





   a) वेदाङ्गशब्दस्य अर्थं निरूप्य वैदिकवाङ्मये वेदाङ्गानां महत्त्वं प्रतिपाद्यताम्।

   b) पाणिनीयशिक्षासरणिमनुसृत्य पाठकानां गुणदोषविचारः निर्णेयः।

4. निम्नोद्धृतयोः **एकस्य** व्याख्या संस्कृतभाषया देवनागरीलिप्या च करणीया। 6

   a) ओभावश्च विवृत्तिश्च शषसा रेफ एव च।
   जिह्वामूलमुपध्मा च गतिरष्टविधोष्मणः॥

   b) कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू।
   स्युर्मूर्धन्या ऋटुरषा दन्त्या लृतुलसाः स्मृताः॥